श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री ब्रह्मपुराणे मार्कण्डेय कृता

॥ श्रीबालमुकुन्द स्तुतिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीबालमुकुन्द स्तुतिः ॥

श्री मार्कण्डेय उवाच
देवदेव जगन्नाथ मायाबालवपुर्धर।
त्राहि मां चारुपद्माक्ष दुःखितं शरणागतम्॥ 1॥

सन्तप्तोऽस्मि सुरश्रेष्ठ संवर्ताख्येन वह्निना।
अङ्गारवर्षभीतं च त्राहि मां पुरुषोत्तम॥ 2॥

शोषितश्च प्रचण्डेन वायुना जगदायुना।
विह्वलोऽहं तथा श्रान्तस्त्राहि मां पुरुषोत्तम॥ 3॥

तापितश्च तशामात्यैः प्रलयावर्तकादिभिः।
न शान्तिमधिगच्छामि त्राहि मां पुरुषोत्तम॥ 4॥

तृषितश्च क्षुधाविष्टो दुःखितश्च जगत्पते।
त्रातारं नात्र पश्यामि त्राहि मां पुरुषोत्तम॥ 5॥

अस्मिन्नेकार्णवे घोरे विनष्टे सचराचरे।
न चान्तमधिगच्छामि त्राहि मां पुरुषोत्तम॥ 6॥

तवोदरे च देवेश मया दृष्टं चराचरम्।
विस्मितोऽहं विषण्णश्च त्राहि मां पुरुषोत्तम॥ 7॥

संसारेऽस्मिन्निरालम्बे प्रसीद पुरुषोत्तम।
प्रसीद विबुधश्रेष्ठ प्रसीद विबुधप्रिय॥ 8॥

प्रसीद विबुधां नाथ प्रसीद विबुधालय।
प्रसीद सर्वलोकेश जगत्कारणकारण॥ 9॥

प्रसीद सर्वकृद्देव प्रसीद मम भूधर।
प्रसीद सलिलावास प्रसीद मधुसूदन॥ 10॥

प्रसीद कमलाकान्त प्रसीद त्रिदशेश्वर।
प्रसीद कंसकेशीघ्न प्रसीदारिष्टनाशन॥ 11॥

प्रसीद कृष्ण दैत्यघ्न प्रसीद दनुजान्तक।
प्रसीद मथुरावास प्रसीद यदुनन्दन॥ 12॥

प्रसीद शक्रावरज प्रसीद वरदाव्यय।
त्वं मही त्वं जलं देव त्वमग्निस्त्वं समीरणः॥ 13॥

त्वं नभस्त्वं मनश्चैव त्वमहङ्कार एव च।
त्वं बुद्धिः प्रकृतिश्चैव सत्त्वाद्यास्त्वं जगत्पते॥ 14॥

पुरुषस्त्वं जगद्व्यापी पुरुषादपि चोत्तमः।
त्वमिन्द्रियाणि सर्वाणि शब्दाद्या विषयाः प्रभो॥ 15॥

त्वं दिक्पालाश्च धर्माश्च वेदा यज्ञाः सदक्षिणाः।
त्वमिन्द्रस्त्वं शिवो देवस्त्वं हविस्त्वं हुताशनः॥ 16॥

त्वं यमः पितृराट्टेव त्वं रक्षोधिपतिः स्वयम्।
वरुणस्त्वमपां नाथ त्वं वायुस्त्वं धनेश्वरः॥ 17॥

त्वमीशानस्त्वमनन्तस्त्वं गणेशश्च षण्मुखः।
वसवस्त्वं तथा रुद्रास्त्वमादित्याश्च खेचराः॥ 18॥

दानवास्त्वं तथा यक्षास्त्वं दैत्याः समरुद्गणाः।
सिद्धाश्चाप्सरसो नागा गन्धर्वास्त्वं सचारणाः॥ 19॥

पितरो वालखिल्याश्च प्रजानां पतयोऽच्युत।
मुनयस्त्वमृषिगणास्त्वमश्विनौ निशाचराः॥ **20**॥

अन्याश्च जातयस्त्वं हि यत्किञ्चिज्जीवसञ्ज्ञितम्।
किं चात्र बहुनोक्तेन ब्रह्मादिस्तम्बगोचरम्॥ **21**॥

भूतं भव्यं भविष्यं च त्वं जगत्सचराचरम्।
यत्ते रूपं परं देव कूटस्थमचलं ध्रुवम्॥ **22**॥

ब्रह्माद्यास्तन्न जानन्ति कथमन्येऽल्पमेधसः।
देव शुद्धस्वभावोऽसि नित्यस्त्वं प्रकृतेः परः॥ **23**॥

अव्यक्तः शाश्वतोऽनन्तः सर्वव्यापी महेश्वरः।
त्वमाकाशः परः शान्तो अजस्त्वं विभुरव्ययः॥ **24**॥

एवं त्वां निर्गुणं स्तोतुं कः शक्नोति निरञ्जनम्।
स्तुतोऽसि यन्मया देव विकलेनाल्पचेतसा।
तत्सर्वं देवदेवेश क्षन्तुमर्हसि चाव्यय॥ **25**॥

॥ इति श्रीबालमुकुन्द स्तुतिः समाप्ता॥